# shrIshAradeshasahasranAmastotram

# શ્રીશારદેશસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shAradeshasahasranAma

File name : shAradeshasahasranaama.itx

Category : sahasranAma, ganesha

Location : doc_ganesha

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, PSA Easwaran

Source : Vinayakatantra

Latest update : August 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીશારદેશસહસ્રનામસ્તોત્રમ્

દેવ્યુવાચ ।
દેવદેવ મહાદેવ ગિરીશ જગતાં પતે ।
સહસ્રનામસ્તોત્રં મે કૃપયાસ્ય વદ પ્રભો ॥ ૧॥

શિવ ઉવાચ ।
બ્રહ્મણસ્પતિસૂક્તસ્થં મન્ત્રાદિવર્ણસમ્ભવમ્ ।
સહસ્રનામસ્તોત્રં તુ વૈદિકં તે બ્રવીમ્યહમ્ ॥ ૨॥

શારદેશમન્ત્રવચ્ચ ઋષ્યાદિકમુદીરિતમ્ ।
સરસ્વતીપતિસ્સોમરાજસ્સોમપ્રપૂજિતઃ ॥ ૩॥

સોમાર્ધશેખરસ્સિદ્ધસ્સિદ્ધેશસ્સિદ્ધિનાયકઃ ।
સિદ્ધવન્દ્યસ્સિદ્ધપૂજ્યસ્સર્વવિદ્યાપ્રદાયકઃ ॥ ૪॥

સર્વાત્મા સર્વદેવાત્મા સદસદ્વ્યક્તિદાયકઃ ।
સંસારવૈદ્યસ્સર્વજ્ઞસ્સર્વભેષજભેષજમ્ ॥ ૫॥

સૃષ્ટિસ્થિતિલયક્રીડો યદુનાથવરપ્રદઃ ।
યોગગમ્યો યોગમયો યોગશાન્તિપ્રદાયકઃ ॥ ૬॥

યોગાચાર્યો યોગદાતા યોગબ્રહ્મ યુગાધિપઃ ।
યજ્ઞેશ્વરો યજ્ઞમૂર્તિર્યજમાનેષ્ટદાયકઃ ॥ ૭॥

યજ્ઞકર્તા યજ્ઞધર્તા યજ્ઞભોક્તા યમીશ્વરઃ ।
મયૂરેશો મયૂરેશપુરાધીશો મયૂરપઃ ॥ ૮॥

મયૂરવાહનો માયી માયિકો મધુરપ્રિયઃ ।
મન્ત્રો મન્ત્રપ્રિયો મન્ત્રી મદમત્તમનોરમઃ ॥ ૯॥

મન્ત્રસિદ્ધિપ્રદો મન્ત્રજ્ઞાનદો મુક્તિદાયકઃ ।
મન્દાકિનીતીરવાસી મુદ્ગરાયુધધારકઃ ॥ ૧૦॥

સ્વાનન્દવાસી સ્વાનન્દનાયકસ્સુખદાયકઃ ।
સ્વસ્વાનન્દપ્રદસ્સ્વસ્વાનન્દયોગસુલભ્યકઃ ॥ ૧૧॥

સ્વાનન્દભવનાધીશસ્સ્વર્ગસ્વાનન્દનાયકઃ ।
સ્વર્ગસ્વાનન્દનિલયસ્સ્વર્ગસ્વાનન્દસૌખ્યદઃ ॥ ૧૨॥

સુખાત્મા સુરસમ્પૂજ્યસ્સુરેન્દ્રપદદાયકઃ ।
સુરેન્દ્રપૂજિતસ્સોમરાજપુત્રસ્સુરાર્ચિતઃ ॥ ૧૩॥

સુરેન્દ્રાત્મા તત્ત્વમયસ્તરુણસ્તરુણીપ્રિયઃ ।
તત્પદસ્તત્પદારાધ્યસ્તપસ્વીજનસેવિતઃ ॥ ૧૪॥

તાપસસ્તાપસારાધ્યસ્તપોમાર્ગપ્રકાશકઃ ।
તત્ત્વમસ્યાકૃતિધરસ્તત્ત્વમસ્યાર્થબોધકઃ ॥ ૧૫॥

તત્ત્વાનાં પરમં તત્ત્વં તારકાન્તરસંસ્થિતઃ ।
તારકસ્તારકમુખસ્તારકાન્તકપૂજિતઃ ॥ ૧૬॥

તત્ત્વાતીતસ્તત્ત્વમયસ્તરુણાદિત્યપાટલઃ ।
ઉપેન્દ્ર ઉડુભૃન્મૌલિરુણ્ડેરકબલિપ્રિયઃ ॥ ૧૭॥

ઉચ્છિષ્ટગણ ઉચ્છિષ્ટ ઉચ્છિષ્ટગણનાયકઃ ।
ઉપેન્દ્રપૂજિતપદ ઉપેન્દ્રવરદાયકઃ ॥ ૧૮॥

ઉન્નતાનન ઉત્તુઙ્ગ ઉદારત્રિદશાગ્રણી ।
ઉમાપૂજિતપાદાબ્જ ઉમાઙ્ગમલસમ્ભવઃ ॥ ૧૯॥

ઉમાવાઞ્છિતસન્દાતા ઉમેશપરિપૂજિતઃ ।
ઉમાપુત્ર ઉમાપુત્રપૂજ્ય ઉમેશવિગ્રહઃ ॥ ૨૦॥

તુરીયસ્તુર્યપદગસ્તુરીયમૂર્તિસંયુતઃ ।
તુમ્બુરુસ્તોત્રસન્તુષ્ટસ્તુરીયવેદસંસ્તુતઃ ॥ ૨૧॥

તુરીયાત્મા તુર્યપદદસ્તુમ્બુરુગાનતોષિતઃ ।
તુષ્ટિપ્રિયસ્તુણ્ડવક્રસ્તુષારહિમસન્નિભઃ ॥ ૨૨॥

તુરીયલોકનિલયસ્તુરીયગુણધારકઃ ।
તુરીયમૂર્તિસમ્પૂજ્યઃ પરમાત્મા પરાત્પરઃ ॥ ૨૩॥

પરઞ્જ્યોતિઃ પરન્ધામ પૂર્ણપ્રણવવિગ્રહઃ ।
પ્રણવઃ પ્રણવારાધ્યઃ પ્રણવાતીતવિગ્રહઃ ॥ ૨૪॥

પ્રણવાસ્યઃ પરમ્બ્રહ્મ પુરુષઃ પ્રકૃતેઃ પરઃ ।
પુરાણપુરુષઃ પૂતઃ પુણ્યાપુણ્યફલપ્રદઃ ॥ ૨૫॥

પદ્મપ્રસન્નનયનઃ પદ્મજાર્ચિત પાદુકઃ ।
યયાતિપૂજનપ્રીતો યયાતિવરદાયકઃ ॥ ૨૬॥

યમીષ્ટવરસન્દાતા યમીસૌભાગ્યદાયકઃ ।
યમીભુક્તિમુક્તિદાતા યમીજ્ઞાનપ્રદાયકઃ ॥ ૨૭॥

યોગમુદ્ગલસમ્પૂજ્યો યોગમુદ્ગલસિદ્ધિદઃ ।
યોગમુદ્ગલવિજ્ઞાતા યોગમુદ્ગલદેશિકઃ ॥ ૨૮॥

યોગિયોગપ્રદો યોગિજ્ઞાનદો યોગશાસ્ત્રકૃત્ ।
યોગભૂમિધરો યોગમાયિકો યોગમાર્ગવિત્ ॥ ૨૯॥

પદ્મેશ્વરઃ પદ્મનાભઃ પદ્મનાભપ્રપૂજિતઃ ।
પદ્માપતિઃ પશુપતિઃ પશુપાશવિમોચકઃ ॥ ૩૦॥

પાશપાણિઃ પર્શુધરઃ પઙ્કજાસનસંસ્થિતઃ ।
પઙ્કજાસનસમ્પૂજ્યઃ પદ્મમાલાધરઃ પતિઃ ॥ ૩૧॥

પન્નગાભરણઃ પન્નગેશઃ પન્નગભૂષણઃ ।
પન્નગેશસુતઃ પન્નગેશલોકનિવાસકૃત્ ॥ ૩૨॥

તમોહર્તા તામસીશસ્તમોભર્તા તમોમયઃ ।
સ્તવ્યસ્તુતિપ્રિયસ્તોત્રં સ્તોત્રરાજપ્રતોષિતઃ ॥ ૩૩॥

સ્તવરાજપ્રિયઃ સ્તુત્યસ્તુરુષ્કસઙ્ઘનાશકઃ ।
સ્તોમયજ્ઞપ્રિયઃ સ્તોમફલદઃ સ્તોમસિદ્ધિદઃ ॥ ૩૪॥

સ્નાનપ્રિયસ્સ્નાનભર્તા સ્નાતકાભીષ્ટદાયકઃ ।
કર્મસાક્ષી કર્મકર્તા કર્માકર્મફલપ્રદઃ ॥ ૩૫॥

કમણ્ડલુનદીતીરનિવાસી કટિસૂત્રભૃત્ ।
કદમ્બગોલકાકારઃ કૂષ્માણ્ડગણનાયકઃ ॥ ૩૬॥

કસ્તૂરિતિલકોપેતઃ કામેશઃ કામપૂજિતઃ ।
કમણ્ડલુધરઃ કલ્પઃ કપર્દી કલભાનનઃ ॥ ૩૭॥

કારુણ્યદેહઃ કપિલઃ કપિલાભીષ્ટદાયકઃ ।

ઉગ્ર ઉગ્રાયુધધરો ઉગ્રરુદ્રપ્રપૂજિતઃ ॥ ૩૮॥

ઉગ્રહર્તા ઉગ્રભર્તા ઉગ્રશાસનકારકઃ ।
ઉગ્રપાણ્ડ્યસુસમ્પૂજ્ય ઉગ્રપાણ્ડ્યેષ્ટદાયકઃ ॥ ૩૯॥

ઉમ્બીજજપસુપ્રીત ઉદીચીદિશિ સંસ્થિતઃ ।
ઉદઙ્મુખ ઉદગ્દેશનિવાસી ઉચિતપ્રિયઃ ॥ ૪૦॥

ઉચિતજ્ઞો ગણેશાનો ગણક્રીડો ગણાધિપઃ ।
ગણનાથો ગજમુખો ગુણેશો ગણનાયકઃ ॥ ૪૧॥

ગુણાધારો ગુણમયો ગુણશાન્તિપ્રધારકઃ ।
ગઁ બીજો ગઁ પદારાધ્યો ગજાકારો ગજેશ્વરઃ ॥ ૪૨॥

ગઙ્ગાધરસમારાધ્યો ગઙ્ગાતીરવિહારકૃત્ ।
દક્ષયજ્ઞપ્રમથનો દહરાકાશમધ્યગઃ ॥ ૪૩॥

દક્ષો દક્ષભક્તિતુષ્ટો દક્ષયજ્ઞવરપ્રદઃ ।
દેવેશો દણ્ડનીતિસ્થો દૈત્યદાનવમોહનઃ ॥ ૪૪॥

દયાવાન્ દિવ્યવિભવો દક્ષિણામૂર્તિનન્દનઃ ।
દક્ષિણામૂર્તિસન્ધ્યાતપદો દેવસુરક્ષકઃ ॥ ૪૫॥

દક્ષિણાવર્તક્ષેત્રસ્થો દેવેન્દ્રપૂજનપ્રિયઃ ।
દ્વૈમાતુરો દ્વિવદનો દ્વિપાસ્યો દ્વીપરક્ષકઃ ॥ ૪૬॥

દ્વિરદો દ્વિરદેશાન આધારશક્તિ મૂર્ધ્નિગઃ ।
આખુકેતન આશાપૂરક આખુમહારથઃ ॥ ૪૭॥

આધારપીઠ આધાર આધારાધેયવર્જિતઃ ।
આશ્રિતાભીષ્ટસન્દાતા આમોદામોદદાયકઃ ॥ ૪૮॥

આનન્દભવનાધીશ આનન્દમૂર્તિધારકઃ ।
આનન્દમય આનન્દ આનન્દકોશસંસ્થિતઃ ॥ ૪૯॥

આખુધ્વજ આખુવાહ આનન્દાતીતવિગ્રહઃ ।
સુધાપ્રિયસ્સુધામૂર્તિસ્સુધાસાગરમધ્યગઃ ॥ ૫૦॥

સુધાપાનરતસ્સિન્ધુદૈત્યહા સિન્ધુદેશગઃ ।
સામગાનપ્રિયસ્સાધુસ્સાધુસિદ્ધિપ્રદાયકઃ ॥ ૫૧॥

સપ્તાશ્વપૂજિતપદસ્સપ્તાશ્વરથમધ્યગઃ ॥

સપ્તલોકશરીરાઢ્યસ્સપ્તદ્વીપનિવાસકૃત્ ॥ ૫૨॥

સમુદ્રરાજસમ્પૂજ્યો નાગાસ્યો નગજાસુતઃ ।
નન્દ્યો નન્દિપ્રિયો નાદો નાદમધ્યે પ્રતિષ્ઠિતઃ ॥ ૫૩॥

નિર્મલો નિષ્કલો નિત્યો નિરવદ્યો નિરઞ્જનઃ ।
નારદાદિસુસંસેવ્યો નિત્યાનિત્યો નિરામયઃ ॥ ૫૪॥

નામપારાયણપ્રીતો નિર્ગુણો નિજલોકગઃ ।
તન્નામજપસુપ્રીતસ્તત્ત્વાતત્ત્વ વિવેકદઃ ॥ ૫૫॥

તદ્ભક્તજનસંસેવ્યસ્તદાજ્ઞા પરિપાલકઃ ।
તિન્ત્રિણ્યન્નપ્રિયતમસ્તન્ત્રશાસ્ત્રવિશારદઃ ॥ ૫૬॥

તન્ત્રગમ્યસ્તન્ત્રવેદ્યસ્તન્ત્રમાર્ગપ્રકાશકઃ ।
તન્ત્રારાધનસન્તુષ્ટસ્તન્ત્રસિદ્ધિપ્રદાયકઃ ॥ ૫૭॥

તન્ત્રમુદ્રાપ્રમુદિતસ્તન્ત્રન્યાસપ્રતોષિતઃ ।
તન્ત્રાભાસમાર્ગહર્તા તન્ત્રપાષણ્ડખણ્ડકઃ ॥ ૫૮॥

તન્ત્રયોગમાર્ગગમ્ય ઊહાપોહદુરાસદઃ ।
ઊર્જસ્વાનૂષ્મલમદ ઊનષોડશવાર્ષિકઃ ॥ ૫૯॥

ઊડાપૂજનસન્તુષ્ટ ઊહાપોહવિવર્જિતઃ ।
ઉમાસ્નુષાસુસંશ્લિષ્ટ ઊડાબાલામનોરમઃ ॥ ૬૦॥

ઉમેશપૂજિતપદ ઉમેશાભીષ્ટદાયકઃ ।
ઊતિપ્રિય ઊતિનુત ઊતિકૃદ્વરદાયકઃ ॥ ૬૧॥

ઊતિત્રયીગાનવર ઊતિત્રિવેદકારણમ્ ।
ઊતિભઙ્ગિપ્રિયતમઃ ત્રાતા ત્રિવેદનાયકઃ ॥ ૬૨॥

ત્રિગુણાત્મા ત્રિલોકાદિઃ ત્રિવક્ત્રસ્ત્રિપદાન્વિતઃ ।
ત્રિમૂર્તિજનકસ્ત્રેતા ત્રિકરસ્ત્રિવિલોચનઃ ॥ ૬૩॥

ત્રિમૂર્તિજપસન્તુષ્ટઃ ત્રિમૂર્તિવરદાયકઃ ।
ત્રિવેણીતીરસંવાસી ત્રિવેણીસ્નાનતોષિતઃ ॥ ૬૪॥

ત્રિવેણીક્ષેત્રનિલયઃ ત્રિવેણીમુણ્ડનપ્રિયઃ ।

ત્રિવેણીસઙ્ગમસ્થાયી ત્રિવેણીક્ષેત્રસિદ્ધિદઃ ॥ ૬૫॥

ત્રિસન્ધ્યાક્ષેત્રનિલયસ્ત્રિસન્ધ્યાક્ષેત્રપાલકઃ ।
ત્રિસન્ધ્યાક્ષેત્રજનકસ્ત્રિસન્ધ્યાગતદૈત્યહા ॥ ૬૬॥

ત્રિસન્ધ્યાગમુનીશાનપાતા ત્રિસન્ધિક્ષેત્રગઃ ।
ત્રિસન્ધ્યાતાપસારાધ્યસ્ત્રિસન્ધ્યામુનિપાલકઃ ॥ ૬૭॥

ત્રિસન્ધ્યામુનિદર્પઘ્નસ્ત્રિપુરાભીષ્ટદાયકઃ ।
ત્રિપુરાપૂજનપ્રીતસ્ત્રિપુરાન્તકપૂજિતઃ ॥ ૬૮॥

ત્રિપુરેશીસમારાધ્યસ્ત્ર્યમ્બકસ્ત્રિપુરાન્તકઃ ।
અનપાયોઽનન્તદૃષ્ટિરપ્રમેયોઽજરામરઃ ॥ ૬૯॥

અનાવિલોઽપ્રતિરથ અષ્ટાત્રિંશત્કલાતનુઃ
અલમ્પટો મિતો ક્ષય્યોઽધનાંશોઽપ્રતિમાનનઃ ॥ ૭૦॥

અષ્ટસિદ્ધિસમૃદ્ધિ શ્રીરષ્ટભૈરવસેવિતઃ ।
અષ્ટાદશૌષધી સૃષ્ટિરષ્ટદ્રવ્યહવિઃ પ્રિયઃ ॥ ૭૧॥

અષ્ટમૂર્તિધ્યેયમૂર્તિરષ્ટમાત્રસમાવૃતઃ ।
અષ્ટપત્રામ્બુજાસીન અષ્ટપ્રકૃતિકારણમ્ ॥ ૭૨॥

અષ્ટચક્રસ્ફુરન્મૂર્તિરષ્ટૈશ્વર્યપ્રદાયકઃ ।
અષ્ટપીઠોપપીઠશ્રીરષ્ટદિક્પતિવન્દિતઃ ॥ ૭૩॥

અગ્નિરક્ષમાલિકાઢ્યો વ્યયોઽષ્ટવસુવન્દિતઃ ।
અષ્ટાદશપુરાણેડ્ય અષ્ટાદશવિધિસ્મૃતઃ ॥ ૭૪॥

અષ્ટાદશલિપિવ્યષ્ટિસમષ્ટિજ્ઞાનકોવિદઃ ।
ભવાબ્ધિતારકો ભાષાજનકો ભારતીપતિઃ ॥ ૭૫॥

ભીમો ભીમવિઘ્નહર્તા ભયત્રાતા ભવોદ્ભવઃ ।
ભવાનીતનયો ભક્તિપ્રિયો ભક્તપ્રવાલકઃ ॥ ૭૬॥

ભક્તાધીનો ભક્તિવશ્યો ભુવનેશીવરપ્રદઃ ।
ભૂપતિર્ભુવનપતિર્ભૂતેશો ભુવનેશ્વરઃ ॥ ૭૭॥

તેજોવતીશિરોરત્નસ્તેજોમણ્ડલમધ્યગઃ ।
તેજોમયલોકવાસી તેજોમયકલેવરઃ ॥ ૭૮॥

તેજોરૂપી તૈજસેશસ્તેજઃપુઞ્જસ્વરૂપવાન્ ।
તેજસ્તત્ત્વેશસમ્પૂજ્યસ્તેજસ્તત્ત્વેષ્ટદાયકઃ ॥ ૭૯॥

તિથિમાતૃસમુદ્ભૂતસ્તિથિમાતૃવરપ્રદઃ ।
તિથિમાતૃસમારાધ્યસ્તિથિમાતૃપ્રતોષિતઃ ॥ ૮૦॥

તિથિમાત્રવ્રતપ્રીતસ્તિથિમાત્રેષ્ટદાયકઃ ।
બ્રહ્મ બ્રહ્માર્ચિતપદો બ્રહ્મચારી બૃહસ્પતિઃ ॥ ૮૧॥

બૃહત્તમો બ્રહ્મવરો બ્રહ્મણ્યો બ્રહ્મવિત્તમઃ ।
બૃહન્નાદાગ્ર્યચીત્કારો બ્રહ્માણ્ડાવલિમેખલઃ ॥ ૮૨॥

બ્રહ્મેશો બ્રહ્મલોકસ્થો બ્રહ્મપુત્રીસમન્વિતઃ ।
બૃહદારણ્યસંવેદ્યો બ્રહ્મવિદ્યામદોત્કટઃ ॥ ૮૩॥

બ્રહ્માણ્ડકુન્દો બ્રહ્મીશો બ્રહ્માવર્તનિવાસકૃત્ ।
બ્રહ્માનન્દમયો બ્રહ્મતનયો બ્રહ્મણસ્પતિઃ ॥ ૮૪॥

મન્દારવૃક્ષસમ્ભૂતો મન્દારકુસુમપ્રિયઃ ।
મન્દારભક્તવરદો મન્દારભક્તિતોષિતઃ ॥ ૮૫॥

મન્દારપૂજનપ્રીતો મન્દારમણિધારકઃ ।
મન્દારમણિસુપ્રીતો મુનિમણ્ડલમધ્યગઃ ॥ ૮૬॥

મુનિપુત્રો મુનીશાનો મુનિમાનસહંસિકઃ ।
મુનિપુત્રસહચરો મુનિબાલસમાવૃતઃ ॥ ૮૭॥

મુનિબાલાભીષ્ટદાતા મુનિબાલસમર્ચિતઃ ।
મુનિબાલભક્તિતુષ્ટો મુનિબાલેપ્સિતપ્રદઃ ॥ ૮૮॥

વિનાયકો વિઘ્નરાજો વિનતાતનયપ્રિયઃ ।
વરેણ્યો વેદજનકો વેદવેદાઙ્ગ તત્ત્વવિત્ ॥ ૮૯॥

વેદાન્તશાસ્ત્રસંવેદ્યો વેદાન્તાગમગોચરઃ ।
વન્દ્યો વાગીશસંસેવ્યો વામનો વામનાર્ચિતઃ ॥ ૯૦॥

વાગીશ્વરીપતિર્વાણીનાયકો વરદાયકઃ ।
વિદ્યાપ્રદો વિભવદો વરેણ્યતનયો વશી ॥ ૯૧॥

સ્તનન્ધયઃ સ્તન્યપાનરતઃ સ્તન્યપ્રવર્ધકઃ ।
સ્તનન્ધયપ્રિયસ્તુર્યશક્તિપુત્રસ્તુરીયપઃ ॥ ૯૨॥

તૌલિસ્નાનપરસ્તૌલિમાસસ્નાનપ્રતોષિતઃ ।
તૌલિમાસજપપ્રીતસ્તૌલિદાનફલપ્રદઃ ॥ ૯૩॥

તુઙ્ગભદ્રાતીરસંસ્થસ્તુઙ્ગાસ્નાનફલપ્રદઃ ।
તુઙ્ગાજલપાનરતઃ તુઙ્ગશૈલનિવાસકૃત્ ॥ ૯૪॥

તરઙ્ગકેલિસંસક્તસ્તરઙ્ગાબ્ધિપ્રભેદકઃ ।
બ્રાહ્મણસ્પત્યયજ્ઞેશો બ્રાહ્મણસ્પત્યહોમભુક્ ॥ ૯૫॥

બ્રાહ્મણસ્પત્યેષ્ટિભોક્તા બ્રહ્મસૂત્રપ્રબન્ધકૃત્ ।
બૃહજ્જાબાલસંવેદ્યો બ્રહ્મવિદ્યાપ્રદાયકઃ ॥ ૯૬॥

બૃહન્માયો બૃહત્સેનો બૃહદ્વિદ્યો બૃહદ્ધનઃ ।
બૃહદ્ગણો બૃહત્કુક્ષિર્બૃહદ્ભાનુર્બૃહદ્બલઃ ॥ ૯૭॥

બૃહદ્રાજ્યપ્રદો બ્રહ્મસૂત્રધૃક્ બૃહદીશ્વરઃ ।
સવિતૃમણ્ડલમધ્યસ્થસ્સવિતા સવિતાર્ચિતઃ ॥ ૯૮॥

સાવિત્રસ્સવિતારાધ્યસ્સૂરસ્સૂર્યોઽથ સૂરજઃ ।
સાવિત્રીતનયસ્સૂર્યમૂર્તિસ્સૌરપ્રપૂજિતઃ ॥ ૯૯॥

સૂરસૂતસમારાધ્યસ્સૌરમાર્ગપ્રકાશકઃ ।
સુરવૃક્ષમૂલસંસ્થસ્સુરદ્રુમસુમપ્રિયઃ ॥ ૧૦૦॥

સુરચન્દનદિગ્ધાઙ્ગઃ સ્વર્ગસૌખ્યપ્રદાયકઃ ।
યોગાગ્નિકુણ્ડસઞ્જાતો યોગાગ્નિજ્યોતિરૂપવાન્ ॥ ૧૦૧॥

યોનિપીઠસન્નિષણ્ણો યોનિમુદ્રાપ્રતોષિતઃ ।
યાસ્કપ્રિયો યાસ્કપૂજ્યો યાસ્કેષ્ટફલદાયકઃ ॥ ૧૦૨॥

યોનિસંસ્થપુષ્કરાઢ્યો યોગિનીગણસેવિતઃ ।
યોગિનીસેવિતપદો યોગિનીશક્તિસંવૃતઃ ॥ ૧૦૩॥

યોગાઙ્ગવેદ્યચરણો યોગસામ્રાજ્યદાયકઃ ।
યોગગીતાપ્રદો યોગમન્ત્રદો યોગવિગ્રહઃ ॥ ૧૦૪॥

તરાતલલોકવાસી તરાતલજનાવૃતઃ ।
તરુણાદિત્યસઙ્કાશસ્તરુણેન્દુસમર્ચિતઃ ॥ ૧૦૫॥

તાલીવનસમાસીનસ્તાલીફલસુભક્ષકઃ ।

તાલીમધુરસપ્રીતસ્તાલીગુળસુભક્ષકઃ ॥ ૧૦૬॥

તાલીવનદેવતેડ્યસ્તાલીદેવીવરપ્રદઃ ।
તાલજઙ્ઘદૈત્યહરસ્તાલજઙ્ઘારિપૂજિતઃ ॥ ૧૦૭॥

તમાલશ્યામલાકારસ્તમાલકુસુમપ્રિયઃ ।
તમાલવનસઞ્ચારી તમાલદેવતાપ્રિયઃ ॥ ૧૦૮॥

અનન્તનામાનન્તશ્રીરનન્તાનન્તસૌખ્યદઃ ।
અનન્તવદનોઽનન્તલોચનોઽનન્તપાદુકઃ ॥ ૧૦૯॥

અનન્તમકુટોપેત અનન્તશ્રુતિમણ્ડિતઃ ।
અનન્તકુક્ષિપૃષ્ઠાઢ્ય અનન્તજાનુમણ્ડિતઃ ॥ ૧૧૦॥

અનન્તોરુભ્રાજમાનોઽનન્તસ્કન્ધગલાન્વિતઃ ।
અનન્તબાહુપાણ્યાઢ્ય અનન્તગુહ્યલિઙ્ગકઃ ॥ ૧૧૧॥

અનન્તોદારગુણવાનનન્તોદારવિક્રમઃ ।
અનન્તસૂર્યસઙ્કાશ અનન્તેન્દુસુશીતલઃ ॥ ૧૧૨॥

સદાશિવસમારાધ્યસ્સદાશિવસુવીર્યજઃ ।
સદાશિવગણેશાનસ્સદાશિવપદપ્રદઃ ॥ ૧૧૩॥

સદાશિવવિઘ્નહરસ્સદાશિવવરપ્રદઃ ।
સદાશિવહાસ્યહેતુઃ સદાશિવવિમોહકઃ ॥ ૧૧૪॥

સદાશિવચન્દ્રહર્તા સદાશિવહૃદિસ્થિતઃ ।
સદાશિવરૂપધરઃ સદાશિવસમીપગઃ ॥ ૧૧૫॥

સદાશિવશક્તિપુત્રસ્સદાશિવસુતાગ્રજઃ ।
અશ્વાસ્યમુનીસંસેવ્ય અશ્વાસ્યભક્તિતોષિતઃ ॥ ૧૧૬॥

અશ્વાસ્યજ્ઞાનસન્દાતા અશ્વાસ્યયોગદાયકઃ ।
અશ્વાસ્યજપસુપ્રીત અશ્વાસ્યશાસ્ત્રતોષિતઃ ॥ ૧૧૭॥

અશ્વાસ્યવિઘ્નસંહર્તા અશ્વાસ્યસિદ્ધિદાયકઃ ।
અશ્વાસ્યદૈત્યસંહર્તા અશ્વિનીઋક્ષસમ્ભવઃ ॥ ૧૧૮॥

અશ્વિનીદેવતારાધ્ય અશ્વિનીશાસ્ત્રતોષિતઃ ।
અમ્બિકાયજ્ઞસન્તુષ્ટ અમ્બિકાભીષ્ટદાયકઃ ॥ ૧૧૯॥

અમ્બાસુતોઽમ્બિકાલોકસંસ્થોઽમ્બાગણસેવિતઃ ।
ઋગ્યજુસ્સામસમ્ભૂતિ ઋદ્ધિસિદ્ધિપ્રવર્તકઃ ॥ ૧૨૦॥

ઋદ્ધિપ્રદો ઋદ્ધિનાથો ઋણત્રયવિમોચકઃ ।
ઋગ્વેદસૂક્તસન્તુષ્ટો ઋગ્વેદમન્ત્રતોષિતઃ ॥ ૧૨૧॥

ઋગ્વેદબ્રાહ્મણપ્રીતો ઋગ્વેદારણ્યહર્ષિતઃ ।
ઋગ્વેદબ્રાહ્મણસ્પત્યસૂક્તોપનિષદીરિતઃ ॥ ૧૨૨॥

ઋતો ઋગ્વેદજનકો ઋણહા ઋદ્ધિપૂજિતઃ ।
ઋતમ્ભરાપ્રજ્ઞયાજ્યો ઋદ્ધિનાથપ્રતોષિતઃ ॥ ૧૨૩॥

ઋવર્ણચક્રમધ્યસ્થો ઋવર્ણજપતોષિતઃ ।
ઋવર્ણમાત્રકાધિશો ઋવર્ણશક્તિનાયકઃ ॥ ૧૨૪॥

ઋતપ્રિયો ઋતાધીશો ઋતજ્ઞો ઋતપાલકઃ ।
ઋતદેવસમારાધ્યો ઋતલોકનિવાસકૃત્ ॥ ૧૨૫॥

ઋતમ્ભરાપીઠસંસ્થો ઋતાધીનસુવિગ્રહઃ ।
ઋતમ્ભરામાર્ગવાસી ઋતપાલકપાલકઃ ॥ ૧૨૬॥

ઋતવાક્ ઋતસઙ્કલ્પો ઋતસઙ્કલ્પદાયકઃ ।
સસન્નયઃ સવિનયઃ સુબ્રહ્મણ્યગણેશ્વરઃ ॥ ૧૨૭॥

સુષ્ઠુસ્રષ્ટા સુષ્ઠુપાતા સુરકુઞ્જરભેદનઃ ।
સુરમાત્રતૃસમારાધ્યસ્સુરમાતૃવરપ્રદઃ ॥ ૧૨૮॥

સુરમાતૃસુતસ્સુષ્ઠુ નરદેવપ્રપાલકઃ ।
સુરાન્તકો દૈત્યહરસ્સુરવર્ગપ્રપાલકઃ ॥ ૧૨૯॥

સુપર્વાણસ્સિદ્ધિદાતા સુપર્વાણગણાવૃતઃ ।
સિંહારૂઢસ્સિંહવાહસ્સિંહાસ્યસ્સિંહદર્પહા ॥ ૧૩૦॥

વિભુર્વિભુગણાધીશો વિશ્વનાથસમર્ચિતઃ ।
વિશ્વાતીતો વિશ્વકર્તા વિશ્વપાતા વિરાટ્પતિઃ ॥ ૧૩૧॥

વિશ્વનાથસુતો વિશ્વનાથશક્તિસમુદ્ભવઃ ।
વિશ્વનાથક્ષેત્રદાતા વિશ્વનાથપ્રપાલકઃ ॥ ૧૩૨॥

વિશ્વનાથપૂજિતાઙ્ઘ્રિયુગલો વિશ્વવન્દિતઃ ।
વિશ્વેશ્વરો વીતિહોત્રો વીતિહોત્રસમર્ચિતઃ ॥ ૧૩૩॥

યુદ્ધકૃદ્યુદ્ધવીરેશો યુદ્ધમણ્ડલસંસ્થિતઃ ।
યુદ્ધેશ્વરો યુદ્ધનાથો યુદ્ધે સિદ્ધિપ્રદાયકઃ ॥ ૧૩૪॥

યુદ્ધવીરો યુદ્ધશૂરો યુદ્ધેશજયદાયકઃ ।
યુદ્ધકાલીશ્વરો યોધનાથો યોધગણાવૃતઃ ॥ ૧૩૫॥

યોધાગ્રગણ્યો યોધેશો યોધેશજયદાયકઃ ।
યોધવિઘ્નપ્રશમનો યોધસિદ્ધિપ્રદાયકઃ ॥ ૧૩૬॥

વસિષ્ઠદેવો વાસિષ્ઠો વસિષ્ઠકુલભૂષણઃ ।
વિશ્વામિત્રપ્રિયકરો વિશ્વામિત્રાભયપ્રદઃ ॥ ૧૩૭॥

વિશ્વામિત્રસિદ્ધિદાતા વિશ્વામિત્રાશ્રમે સ્થિતઃ ।
વિશ્વામિત્રતપસ્તુષ્ટો વિશ્વામિત્રેપ્સિતપ્રદઃ ॥ ૧૩૮॥

વિશ્વામિત્રજ્ઞાનદાતા વિશ્વામિત્રસુયોગદઃ ।
વિશ્વામિત્રવંશદેવો વિશ્વામિત્રેષ્ટદૈવતમ્ ॥ ૧૩૯॥

વામદેવસમારાધ્યો વામમાર્ગપ્રતોષિતઃ ।
ઉરુક્રમસમારાધ્ય ઉરુક્રમવરપ્રદઃ ॥ ૧૪૦॥

ઉરુક્રમયજ્ઞદાતા ઉરુક્રમમખોદ્ભવઃ ।
ઉરુક્રમેન્દ્રપદદ ઉરુક્રમસુરક્ષકઃ ॥ ૧૪૧॥

ઉરુક્રમવંશદેવ ઉરુભીમપરાક્રમઃ ।
ઊર્વશીનટનપ્રીતઃ ઊર્વશીગાનલોલુપઃ ॥ ૧૪૨॥

ઊર્વશીપુત્રસુખદ ઊર્વશીનાથપૂજિતઃ ।
ઊર્વશીનાથેપ્સિતદ ઊર્વશીલોકદાયકઃ ॥ ૧૪૩॥

બ્રાહ્મણો બ્રાહ્મણેશાન બ્રાહ્મણેન્દ્રસુપૂજિતઃ ।
બ્રાહ્મણ્યકર્મસન્તુષ્ટો બ્રાહ્મણ્યમન્ત્રતોષિતઃ ॥ ૧૪૪॥

બ્રાહ્મણબ્રહ્મયજ્ઞેશો બ્રાહ્મણવરદાયકઃ ।
બ્રાહ્મણાય વેદદાતા બ્રાહ્મણાયાર્થદાયકઃ ॥ ૧૪૫॥

બ્રાહ્મણાય કામદાતા બ્રાહ્મણાય સુમુક્તિદઃ ।
બ્રહ્મમેધયજ્ઞતુષ્ટો બ્રહ્મમેધહવિઃપ્રિયઃ ॥ ૧૪૬॥

બ્રહ્મમેધસંસ્કૃતાય બ્રહ્મલોકપ્રદાયકઃ ।

બ્રહ્મપ્રિયગણેશાનો બ્રહ્મપ્રિયગણાર્ચિતઃ ॥ ૧૪૭॥

બ્રહ્મપ્રિયભક્તિતુષ્ટો બ્રહ્મપ્રિયવરપ્રદઃ ।
બ્રહ્મપ્રિયમુક્તિદાતા બ્રહ્મપ્રિયકૃતોદ્યમઃ ॥ ૧૪૮॥

બ્રહ્મપ્રિયપ્રભુર્બ્રહ્મપ્રિયત્રાણકૃતોદ્યમઃ ।
બ્રહ્મપ્રિયેડ્યચરિતો બ્રહ્મપ્રિયનમસ્કૃતઃ ॥ ૧૪૯॥

બ્રહ્મપ્રિયભયહરો બ્રહ્મપ્રિયનમસ્કૃતઃ ।
બ્રહ્મપ્રિયસંશયઘ્નો બહ્મવિદ્બ્રહ્મદાયકઃ ॥ ૧૫૦॥

બ્રહ્મપ્રિયાર્તિશમનો બ્રહ્મપ્રિયફલપ્રદઃ ।
ઇન્દિરાનાયકશ્ચેન્દુભૂષણશ્ચેન્દિરાપ્રિયઃ ॥ ૧૫૧॥

ઇન્દીવરકર્ણિકાસ્થ ઇન્દીવરવિલોચનઃ ।
ઇન્દીવરસમપ્રખ્ય ઇન્દીવરશયાનકૃત્ ॥ ૧૫૨॥

ઇન્દીવરાસનારૂઢ ઇન્દિરાતનયાપતિઃ ।
ઇન્દિરાદ ઇન્દિરેશ ઇન્દિરાગણનાયકઃ ॥ ૧૫૩॥

ઇન્દિરાષ્ટકસન્દાતા ઇન્દિરાબીજતોષિતઃ ।
ઇન્દિરાબીજસંયુક્તબીજમન્ત્રમનુપ્રભુઃ ॥ ૧૫૪॥

વીરપાણ્ડ્યસમારાધ્યો વીરપાણ્ડ્યવરપ્રદઃ ।
વીરચોલસમારાધ્યો વીરચોલેષ્ટદાયકઃ ॥ ૧૫૫॥

વીરબ્રબાહુપૂજિતાઙ્ઘ્રિર્વીરમાહેન્દ્રવન્દિતઃ ।
વીરમાહેશવરદો વીરરાક્ષસશત્રુહા ॥ ૧૫૬॥

વીરશૂરશૌર્યદાતા વીરાન્તકબલપ્રદઃ ।
વીરધીરધૈર્યદાતા વીરપુરન્દરેષ્ટદઃ ॥ ૧૫૭॥

વીરમાર્તાણ્ડવરદો વજ્રબાહ્વિષ્ટસિદ્ધિદઃ ।
વજ્રબાહુનુતો વજ્રબાહુવીર્યજયપ્રદઃ ॥ ૧૫૮॥

સઙ્કષ્ટહારકસ્સઙ્કષ્ટહરતિથિસમ્ભવઃ ।
સઙ્કષ્ટહરમન્ત્રાત્મા સર્વસઙ્કષ્ટનાશનઃ ॥ ૧૫૯॥

સઙ્કષ્ટિહરદિનરાટ્ સઙ્કષ્ટિમાતૃપૂજિતઃ ।
સઙ્કષ્ટિવ્રતસન્તુષ્ટસ્સઙ્કષ્ટિપૂજનપ્રિયઃ ॥ ૧૬૦॥

સદ્બુષ્ટિવૃતવરદસ્સાર્વભૌમવરપ્રદઃ ।
સાર્વભૌમગર્વહરસ્સાર્વભૌમારિભઞ્જકઃ ॥ ૧૬૧ ॥

સાર્વભૌમગીતગુણસ્સાર્વભૌમધનપ્રદઃ ।
સાર્વભૌમકામદાતા સાર્વભૌમસુમુક્તિદઃ ॥ ૧૬૨ ॥

તારાપતિસ્તારેશેડ્યસ્તારાદોષનિવારકઃ ।
તારાપુત્રસમારાધ્યસ્તારાગણનિષેવિતઃ ॥ ૧૬૩ ॥

તારાપુત્રાભીષ્ટદાતા તારાપુત્રવરપ્રદઃ ।
તારાપુત્રજ્ઞાનદાતા તારાપુત્રસુસિદ્ધિદઃ ॥ ૧૬૪ ॥

તારેશચૂડસ્તારેશવરદસ્તારકાર્ચિતઃ ।
તારાકર્તા તારકેશસ્તારાભર્તા તમીપ્રિયઃ ॥ ૧૬૫ ॥

તલવકારસઙ્ગીતસ્તમીનાથસ્તમીપ્રિયઃ ।
તમીપૂજનસન્તુષ્ટસ્તમીજપવરપ્રદઃ ॥ ૧૬૬ ॥

તમીહવનસન્તુષ્ટસ્તમીયજનતોષિતઃ ।
તમપ્રકૃતિસંયુક્તસ્તમપ્રકૃતિપૂજિતઃ ॥ ૧૬૭ ॥

તમપ્રકૃતિસઞ્જાતબ્રહ્માણ્ડગણધારકઃ ।
તામસીમાયાસંયુક્તસ્તામસીસ્તુતવૈભવઃ ॥ ૧૬૮ ॥

તામસીનાયકેશાનસ્તામસીનાયકેષ્ટદઃ ।
ઋણીજનસમારાધ્ય ઋણીસંસ્તુતવૈભવઃ ॥ ૧૬૯ ॥

ઋણીનાથો ઋણીગીતો ઋણીજનસુરક્ષકઃ ।
ઋણીભર્તા ઋણીધર્તા ઋણીઋણહરઃ ક્ષણાત્ ॥ ૧૭૦ ॥

ઋણીવન્દ્યો ઋણીજપ્યો ઋણીસ્તુત્યો ઋણીપ્રિયઃ ।
ઋણીધામા ઋણીગોપ્તા ઋણીગણનિષેવિતઃ ॥ ૧૭૧ ॥

યમીજનસમારાધ્યો યમીસંસ્તુતવૈભવઃ ।
યમીનાથો યમીગીતો યમીજનસુરક્ષકઃ ॥ ૧૭૨ ॥

યમીભર્તા યમીધર્તા યમીભયહરઃ ક્ષણાત્ ।
યમીવન્દ્યો યમીજપ્યો યમીસ્તુત્યો યમીપ્રિયઃ ॥ ૧૭૩ ॥

યમીધામા યમીગોપ્તા યમીગણનિષેવિતઃ ।
સૃણિહસ્તસ્સૃણિધરઃ સૃણીશાનસ્સૃણિપ્રિયઃ ॥ ૧૭૪ ॥

સંજ્ઞાપતિસમારાધ્યસ્સંજ્ઞાપતિસ્તુતિપ્રિયઃ ।
સંજ્ઞાપતિગણેશાનસ્સંજ્ઞાપતિસ્વરૂપધૃક્ ॥ ૧૭૫ ॥

સંજ્ઞાપતિવન્દ્યપાદસ્સંજ્ઞેશગીતસદ્ગુણઃ ।
સંજ્ઞેશગર્વસઞ્છેત્તા સંજ્ઞેશવરદર્પહા ॥ ૧૭૬ ॥

સંજ્ઞેશપ્રવણસ્વાન્તસ્સંજ્ઞેશગણસંસ્તુતઃ ।
સંજ્ઞેશાર્ચિતપાદાબ્જો સંજ્ઞેશભયહારકઃ ॥ ૧૭૭ ॥

યોગિગેયગુણો યોગિચરિતો યોગતત્ત્વવિત્ ।
યોગીન્દ્રત્રાસહા યોગગ્રન્થતત્ત્વવિવેચકઃ ॥ ૧૭૮ ॥

યોગાનુરાગો યોગાઙ્ગો યોગગઙ્ગાજલોદ્વહઃ ।
યોગાવગાઢજલધિર્યોગપ્રજ્ઞો યુગન્ધરઃ ॥ ૧૭૯ ॥

યોગીગીતસુચારિત્રો યોગીન્દ્રગણસેવિતઃ ।
યોગધાતા યોગભર્તા યોગારાતિનિષૂદનઃ ॥ ૧૮૦ ॥

તરણિસ્તરણીશાનસ્તરણીપ્રીતિવર્ધનઃ ।
તરણીગર્વસઞ્છેત્રા તરણીગીતસદ્ગુણઃ ॥ ૧૮૧ ॥

તરણિપ્રવણસ્વાન્તો તરણીવરદાયકઃ ।
તરણિત્રાણસન્નદ્ધસ્તરણીસમરક્ષમઃ ॥ ૧૮૨ ॥

તરણીગીતચરિતસ્તરણીગીતસદ્ગુણઃ ।
તરણીપ્રિયકર્તા ચ તરણ્યાગમસારવિત્ ॥ ૧૮૩ ॥

તરણીસેવિતપાદાબ્જસ્તરણીપ્રિયનન્દનઃ ।
તરણીપ્રિયાસમારાધ્યસ્તરણિમાર્ગકોવિદઃ ॥ ૧૮૪ ॥

ઇલાપતિરિલાનાથ ઇલાનાથવરપ્રદઃ ।
ઇલાવૃતખણ્ડવાસી ઇલાવૃતજનપ્રિયઃ ॥ ૧૮૫ ॥

ઇલાવૃતગિરિસ્થાયી ઇલાવૃતગણાર્ચિતઃ ।
ઇલાવૃતેષ્ટવરદ ઇલાવૃતસુખપ્રદઃ ॥ ૧૮૬ ॥

ઇલાવૃતધર્મદાતા ઇલાવૃતધનપ્રદઃ ।
ઇલાવૃતકામપૂર ઇલાવૃતસુમુક્તિદઃ ॥ ૧૮૭ ॥

ઇલાવૃતગીતતત્ત્વ ઇલાવૃતજનાશ્રિતઃ ।

ચણ્ડ ચણ્ડેશસુહૃચ્ચણ્ડીશશ્ચણ્ડવિક્રમઃ ॥ ૧૮૮॥

ચરાચરપતિશ્ચિન્તામણિચર્વણલાલસઃ ।
ચિન્તામણિશ્ચિન્તિતાર્થદાયકશ્ચિત્તસંસ્થિતઃ ॥ ૧૮૯॥

ચિદાકાશશ્ચિદાભાસશ્ચિદાત્મા ચિચ્ચિદીશ્વરઃ ।
ચિત્તવૃત્તિમયીનાથશ્ચિત્તશાન્તિપ્રદાયકઃ ॥ ૧૯૦॥

અમ્બિકેશેષ્ટવરદ અમ્બિકેશભયાપહઃ ।
અમ્બિકેશગુરુરમ્બાપતિધ્યાતપદામ્બુજઃ ॥ ૧૯૧॥

અમ્બાપતિસ્તુતશ્ચામ્બાનાથારાધ્યોઽમ્બિકાસુતઃ ।
અમ્બાવિદ્યાસુતત્ત્વજ્ઞ અમ્બાપ્રીતિવિવર્ધનઃ ॥ ૧૯૨॥

અમ્બાઙ્ગમલસમ્ભૂત અમ્બાજઠરસમ્ભવઃ ।
અમ્બિકેશવીર્યજાત અમ્બિકેશેક્ષણોદ્ભવઃ ॥ ૧૯૩॥

અમ્બિકેશહાસ્યજાત અમ્બિકાકોપસમ્ભવઃ ।
અમ્બિકેશધ્યાનજાત અમ્બિકેશગણાવૃતઃ ॥ ૧૯૪॥

અમ્બિકેશસૈન્યનાથ અમ્બિકેશજયપ્રદઃ ।
અમ્બિકેશશિરોહર્તા અમ્બિકેશેન્દુહારકઃ ॥ ૧૯૫॥

અમ્બિકેશહૃદારૂઢ અમ્બિકેશસ્થલાભિતઃ ।
અમ્બિકોત્સઙ્ગનિલય અમ્બિકાજ્ઞાપ્રપાલકઃ ॥ ૧૯૬॥

અમ્બિકાગણસંવીત અમ્બિકામાર્ગકોવિદઃ ।
અમ્બિકાગીતચરિત અમ્બારિસૈન્યનાશકઃ ॥ ૧૯૭॥

અમ્બિકેશપાર્શ્વસંસ્થ અમ્બાલોકનિવાસકૃત્ ।
નિરોધાચિત્તવૃત્તિસ્થો નિજાનન્દપ્રદાયકઃ ॥ ૧૯૮॥

નૈજકર્તા નૈજભર્તા નૈજધર્તા નિરોધગઃ ।
નૈજવાસી નૈજદાતા નૈજશક્તિસમન્વિતઃ ॥ ૧૯૯॥

નૈજયોગપ્રદો નૈજજ્ઞાનદો નિજલોકદઃ ।
નૈજધર્મપ્રદો નૈજવિદ્યાદો નિજકામદઃ ॥ ૨૦૦॥

અપર્ણાપૂજિતપદ અપર્ણેશપ્રપૂજિતઃ ।
અપર્ણેશેષ્ટવરદ અપર્ણેશભયાપહઃ ॥ ૨૦૧॥

અપર્ણેશધ્યાતપદ અપર્ણેશગણાવૃતઃ ।
અપર્ણેશધ્યાનજાત અપર્ણાહાસ્યસમ્ભવઃ ॥ ૨૦૨॥

ઇદં નામ્નાં સહસ્રન્તુ બ્રહ્મણાં બ્રહ્મણસ્પતેઃ ।
સૂક્તમન્ત્રાક્ષરજાતં બ્રહ્મણસ્પતિતોષદમ્ ॥ ૨૦૩॥

ય ઇદં પ્રયતઃ પ્રાતઃ ત્રિસન્ધ્યં વા પઠેન્નરઃ ।
વાઞ્છિતં સમવાપ્નોતિ ગણનાથપ્રસાદતઃ ॥ ૨૦૪॥

ધર્માર્થી ધર્મમાપ્નોતિ ધનાર્થી લભતે ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યાં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૨૦૫॥

પુત્રાર્થી લભતે પુત્રાન્ કામાર્થી કામમાપ્નુયાત્ ।
નિષ્કામો યઃ પઠેદેતદ્ગણેશાન પરાયણઃ ॥ ૨૦૬॥

સપ્રતિષ્ઠાં પરાં પ્રાપ્ય નિજલોકમવાપ્નુયાત્ ।

॥ ઇતિ શ્રીવિનાયકતન્ત્રે શ્રીશારદેશસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Ravin Bhalekar ravibhalekar at hotmail.com
Proofread by Ravin Bhalekar, PSA Easwaran

*shrIshAradeshasahasranAmastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*